© 2017 IJSRSET | Volume 3 | Issue 6 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section : Education

# शैक्षिकानुसन्धानम्



**त्रिलोकीनाथ मिश्र**
**शोधच्छात्र**
**राष्ट्रीय संस्कृतसंस्थान,**
**मुम्बई परिसर**

शिक्षाक्षेत्रे कृतमनुसमन्धानं शैक्षिकानुसन्धानम् । यद्यपि विभिन्नशिक्षाशास्त्रिभिः अनुसन्धानस्य विभिन्नपरिभाषाः कृतास्तथापि विषयेऽस्मिन् सर्वेषां मतैक्यं वर्तते यत् शैक्षिकसमस्यायाः समाधानार्थं वैज्ञानिकानुसन्धानस्य सिद्धान्तानाञ्च प्रयोगः शैक्षिकानुसन्धाने सन्निहितो भवति। साम्प्रतं शिक्षाक्षेत्रे अनुदिनं परिवर्तनं जायते । अनेन परिवर्तनेन बहव्यः समस्याः समुद्भवन्ति । एतासां समस्यानां समाधानं शिक्षाशास्त्रिभिः अन्वेष्यते। अतः समस्यासमाधानाय शिक्षाशास्त्रिभिः स्वीकृतविधयः शैक्षिकानुसन्धानमिति नाम्ना उच्यते।

शैक्षिकानुसन्धानस्य स्पष्टीकरणार्थं शिक्षाशास्त्रिभिः प्रदत्ताः काश्चन परिभाषाः अधः प्रस्तूयन्ते-

**GOODS** महोदयेनोच्यते - **शैक्षिकानुसन्धानं नाम शिक्षाक्षेत्रे शैक्षिकसमस्यामाश्रित्य क्रियमाणमध्ययनमन्वेषणञ्च** इति ।[1]

**MONERO** महोदयानुसारं - **शिक्षानुसन्धानस्य अन्तिमं लक्ष्यं सिद्धान्तानां प्रतिपादनम् एवञ्च शिक्षाक्षेत्रे नवीनप्रक्रियाणां विकासः इति ।** [2]

**हेमनजुनियरमहोदयेन** एवमुच्यते- **शैक्षिकानुसन्धानं नाम व्यवहारविज्ञानस्य अङ्गमेकमस्ति, अनेन मानवीयव्यवहारस्य ज्ञानं तस्य व्याख्याम् ऊह्यते । क्वचित्तु इदं तस्य नियन्त्रणमपि करोतीति ।**[3]

**SAX & GILBERT** महोदयाभ्याम् अभिप्रायः वर्तते **शैक्षिकानुसन्धानं नाम कार्यकरण-सम्बन्धस्याध्ययनमेव । इदञ्चान्वेषकेण अभिप्रभावितं वर्तमानस्थितिं विवृणोति इति ।**[4]

**शैक्षिकानुसन्धानस्यावश्यकता (Need of Study)**

समाजपरिवर्तनशीलम् । परिवर्तनशीलसमाजेन सह शिक्षायाः अपि परिवर्तनं जातम् । वैज्ञानिकप्राविधिकयुगे साम्प्रतिकशिक्षाक्षेत्रे नूतनकौशलानां, नूतनप्रविधीनां, नूतनसिद्धान्तानां च प्रयोगो संदृश्यते । एवञ्च प्रशिक्षणक्षेत्रे नूतनतथ्यानामन्वेषणं जायते । परन्तु नव्यानुसन्धानेन पुनः काश्चन समस्याः समुद्भवन्ति । काश्चन समस्याः तु प्राक्कालादेव सन्ति । अतः अनुदिनं शिक्षायाः जटिलत्वं वर्धते । सामान्यरूपेण वयं समस्याभिः परिचिताः, परन्तु तासां समस्यानां ज्ञानं नैव पर्याप्तम् । अपि तु ताः कीदृश्यः समस्याः ? तासां मूलकारणानि कानि ? निवारणोपायाः के ? इत्यादिकं ज्ञानम् आवश्यकं वर्तते । साम्प्रतिकभारतीयशिक्षाप्रणाली दोषपूर्णा इति राजनीतिज्ञाः, समाजशास्त्रज्ञाः, शिक्षाशास्त्रज्ञाः, सामान्यजनाश्चापि अभिप्रयन्ति। इयं शिक्षाप्रणाली निरर्थका, असङ्गता, अनुपयुक्ता चेति बहुभिरुच्यते।

---

1 . शर्मा डा.आर.ए.,शिक्षा अनुसन्धान के मूल तत्व एवं शोधप्रक्रिया, पृ.स.27

2 .शर्मा डा.आर.ए.,शिक्षा अनुसन्धान के मूल तत्व एवं शोधप्रक्रिया, पृ.स.27

3 . पाण्डेय डा.के.पी.शैक्षिक अनुसन्धान पृ.सं. 57

4 . **SAX & GILBERT** शिक्षा अनुसन्धान के आधार पृ.स. 18

IJSRSET1836365 | Received : 01 Oct 2017 | Accepted : 20 Oct 2017 | September-October-2017 [(3)6: 1122-1123 ]

परमेतादृशी वार्ता बहुधा संकुचितदृष्टिकोणस्य परिणामो वर्तते । वस्तुतः शिक्षाप्रणाल्यां कीदृश्यः त्रुट्यः सन्ति ? अस्यां कीदृशं संशोधनमपेक्षते ? अस्मिन् विषये सर्वे स्वमतं प्रस्तुवन्ति, तथापि स्वातन्त्र्यस्य त्रिषष्टिवर्षानन्तरमपि वयमपेक्षितपरिणामं न प्राप्तवन्तः । यद्यपि अस्मिन् क्षेत्रे अनेकानि कारणानि वर्तन्ते, तथापि प्रमुखं कारणं तु शिक्षाक्षेत्रे अनुसन्धानस्याभावरेव । अनुसन्धानस्य दोषाः के ? तत्र कीदृशः परिहारः अपेक्षितः ? अस्य निश्चयात्मकं निर्देशमिदानीमपि नाभवत् । अनुसन्धानाधारितविचारेषु यादृशं बलं विद्यते न तथा सामान्येषु । अतः नास्ति कोऽपि संशयः यत् शिक्षाक्षेत्रे अनुसन्धानस्य महत्त्यावश्यकता वर्तते इति ।

**शैक्षिकानुसन्धानस्य प्रकृतयः (**Nature of Educational Research**)**

शैक्षिकानुसन्धानस्य  निम्नलिखिताः प्रकृतयः वर्तन्ते तद्यथा -

१. शैक्षिकानुसन्धानं शिक्षायाः स्वस्यदर्शनस्योपरि आधारितं भवति ।
२. शैक्षिकानुसन्धानं सूक्ष्मं तथा कल्पनायाः उपरि आधारितं भवति ।
३. शैक्षिकानुसन्धाने अन्तः विषयात्मकपद्धतेः प्रयोगो भवति ।
४. शैक्षिकानुसन्धानं शिक्षाक्षेत्रे विकासं करोति तथा तस्य विकासस्य समस्यायाः समाधानं विदधाति ।
५. शैक्षिकानुसन्धानं केवलं शिक्षाशास्त्रज्ञाः नैव कुर्वन्ति । अपितु शिक्षक-मुख्याध्यापक-निरीक्षक-प्रशासकाश्च कुर्वन्ति ।
६. शैक्षिकानुसन्धाने तावत् शुद्धता नैव भवति यावत् प्राकृतिकविज्ञानस्य सन्निवेशः अनुसन्धाने भवति ।
७. शैक्षिकानुसन्धाने व्ययः न्यूनः भवति ।
८. शैक्षिकानुसन्धानं कार्यकारणयोः सम्बन्धस्योपर्याधारितं भवति ।

**शिक्षानुसन्धानस्येतिहासः (** History of Education Research**)**

भारते शैक्षिकानुसन्धानं न प्राचीनम् । इदानीमपि भारते शैक्षिकानुसन्धानं बाल्यावस्थायामस्ति इति एतादृशः विचारः शिक्षाऽऽयोगेन 1964 तमे वर्षे प्रकटीकृतः ।

किन्तु इदानीं भारतेऽपि शैक्षिकानुसन्धानं शैशवावस्थायाम नास्तीति । स्वतन्त्रतायाः षष्ट्योत्तरवर्षेषु शिक्षाक्षेत्रे महती प्रगतिर्जाता । देशस्य शैक्षिकानुसन्धानस्य विकासार्थं शिक्षाऽऽयोगेन (1964-66) निम्नलिखितमन्तव्याः प्रकटिताः, तद्यथा- **यदि साम्प्रतिकशैक्षिकव्यवस्थासु परिवर्तनमपेक्ष्यते तर्हि शैक्षिकानुसन्धानस्य विकासार्थं प्रयासः करणीयस्तथा शैक्षिकनीतिनिर्धारणे शिक्षायाः परिष्काराय चास्य प्रयोगः कर्त्तव्यः इति ।**

भारते संस्कृतशिक्षाक्षेत्रे अनुसन्धानमतीव प्राचीनकालादेव जायते ।

ऋग्वेदस्य इदं सूक्तमनुसन्धानस्यैवावश्यकतां द्योतयति तद्यथा-

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत** [5] इति ।

---

[5]. ऋग्वेदः 1-7-2